संस्कृत

स्तोत्र

क्र.१.२२९

# सिद्धलक्ष्मीस्तोत्र

खोल सं.२३५

(1)

श्रीगणेशायनमः ॥ अस्यश्रीसिद्धलक्ष्मीस्तोत्रमंत्रस्यहिरण्य
गर्भऋषिः ॥ श्रीमहाकालीमहालक्ष्मीमहासरस्वतीदेवता ॥ अनु
ष्टुप्छंदः ॥ ॐबीजं । ह्रींशक्तिः । श्रींकिलकं ॥ ममसमस्तक्लेश
पीडादारिद्र्यनिरसनार्थं सर्वलक्ष्मीप्राप्त्यर्थं जपेवि० ॥
अथन्यासः ॥ ॐश्रींसिद्धलक्ष्मी अंगुष्टा० ॐह्रींविष्णुते
जसेतर्जनी० ॐक्लींअमृतानंदे मध्यमा० ॐश्रीह्रींअना
मिका० । ॐश्रींदैत्यमर्दिनीकनिष्ठि० ॐश्रींह्रींक्लींश्रींॐ
ब्राह्मीवैष्णवीकरतलकर० एवंहृदयादि ॥ ॐश्रींसिद्धल
क्ष्मीहृदया० ॐह्रींविष्णुतेजसेसिरसे० ॐक्लींअमृतानंदे
शिखा० ॐश्रींदैत्यमर्दिनीकवचा० ॐतेजःप्रकाशी
नेनेत्रत्रयाय० ॐश्रींह्रींक्लींश्रींॐअस्त्राय० ॐभ

सि.ल. १ भुवस्वरोमितिदिग्बंधः॥ अथध्यानं॥ ब्राह्मीचवैष्णवीरौद्री
षट्भुजांचचतुर्भुजां॥ त्रिनेत्रां खड्गत्रिशूलपद्मचक्रगदा
(2) धरां॥ पीतांबरधरादेवीनानालंकारभूषितां॥ तेजःपुंजध्व
टैश्रेष्ठे ध्यायेद्बालांकुमारिकां॥ अथमंत्रः॥ ॐश्रींह्रींक्लीं
श्रीॐइतिमंत्रः॥ अस्यपुरश्चरणसंख्या ४४०॥ पक्षांभ
मरे॥ ॐकारविष्णुरूपस्वविष्णुहृदयसंस्थिते॥ विष्णुभो
दादमानंदेह्रींकारांबररूपिणी॥१॥ मतानंदेकरेभद्रेस
दाआनंददाइति॥ श्रीदेसमादेनीप्रोक्तामा[illegible]लिनीशत्रुमर्दि
नी॥२॥ तेजःप्रकाशीतांदेवीवरदांशुभकारिणीं॥ ब्राह्मीचवै
ष्णवीरौद्रीकालिकारक्तचामुंडी॥३॥ ॐकारब्रह्मरूपे
णनकारोविष्णुमव्ययं॥ मकारपुरुषान्नामदेवीप्रणव १

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(2A)

मुच्यते॥४॥सूर्यकोटिप्रतीकाशांचंद्रकोटिसमप्रभां॥त
न्मध्येनिराकरणंसूक्ष्मंब्रह्मउपास्महे॥५॥ॐकारपरमा
नंदंक्रीयतेचसुखावहं॥सिद्धलक्ष्मीर्मोक्षलक्ष्मीआद्यल
क्ष्मीनमोस्तुते॥६॥सर्वमंगलमांगल्येशिवेसर्वार्थसा
धके॥शरण्येत्र्यंबकेगौरीनारायणीनमोस्तुते॥७॥प्रथ
मंअंबिकेगौरीद्वितीयावैष्णवीतथा॥त्रितीयेकमला
प्रोक्ताचतुर्थेसुंदरीजया॥८॥पंचमीविष्णुपत्नीचष
ष्टीकात्यायनीतथा॥सप्तमीतुवरारोहाअष्टमीहरिव
ल्लभा॥९॥नवमीखड्गिनीम्लीदशमीदेवदेवकी॥ए
कादशीसिद्धलक्ष्मीद्वादशीहंसवाहिका॥१०॥यतस्तो

Joint Project of The Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

सि. त्रमिदंमंत्रंयःपठेत्सततंनरः॥सर्वापद्भ्योविमुच्येतनात्र
२ कार्याविचारणा॥११॥एकमासंद्विमासंवात्रिमासंचतुर्थ
कं॥पंचमासंषण्मासंत्रिकालंयःसदापठेत्॥ब्राह्मणःक्ले
(3) शीतोदुखाद्दारिद्र्यभयपीडितः॥१२॥जन्मांतरसहस्रे
षुमुच्यतेसर्वकिल्बिषैः॥१३॥अलक्ष्म्यालभतेलक्ष्मीअ
पुत्रोपुत्रवान्भवेत्॥धन्यायशस्वीशत्रुघ्नोवह्निचोरभ
येषुच॥१४॥ईश्वरेणकृतंस्तोत्रंप्राणिनांहितकारणं॥
स्तुवंतुब्राह्मणानित्यंदारिद्र्यंनबाध्यते॥१५॥सर्वपा
पविनिर्मुक्तोसर्वसिद्धिप्रदायिनी॥इतिब्रह्मांडपुराणे
सिद्धमथनेईश्वरविष्णुसंवादेसिद्धलक्ष्मीस्तोत्रंसंपूर्णं॥ २

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---

**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com